National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(60): 204-206
© 2025 NJHSR
www.sanskritarticle.com

कृष्णानुजा देओ
विद्यावारिधिः शोधच्छात्रा,
ज्योतिषवास्तुविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः,
आन्ध्रप्रदेशः

Correspondence:
कृष्णानुजा देओ
विद्यावारिधिः शोधच्छात्रा,
ज्योतिषवास्तुविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः,
आन्ध्रप्रदेशः

# ज्योतिषशास्त्रे विवाहविमर्शः

**कृष्णानुजा देओ**

मनुना विवाहस्य अष्टौ भेदाः प्रोक्ताः। ते च- ब्राह्मः, देवः, आर्षः, प्राजापत्यः, आसुरः, गान्धर्वः, राक्षसः, पैशाचः इति। अष्टानां विवाहानां लक्षणविषये कथ्यते- वरं स्वगेहे आहूय वित्तानुसारं कन्यायाः वस्त्रभूषणपरिधानपूर्वकं शुभमुहूर्ते यो विवाह आयोजितो भवति स ब्राह्मविवाहः, एतादृश्याः विवाहयुतकन्यायाः यः पुत्रो जायते स पित्रोः एकविंशकुलं शुद्धीकरोति। यज्ञकाले ऋत्विजः उपस्थितौ कन्यादानप्रक्रिया दैवविवाह इति नाम्ना ज्ञायते, ईदृश्याः विवाहवत्याः कन्यायाः यः पुत्रो जायते स पक्षद्वयं चतुर्दशकुलञ्च शुद्धीकरोति। यस्यां विवाहपद्धतौ गोद्वयमादाय अथवा गोद्वयोः मूल्यं नीत्वा यो विवाहः सञ्जायते सः आर्षविवाहः, एतादृशविवाहकृतकन्यायाः यः पुत्रः जायते स षट् वंशानां पवित्रतां संघटयति। धर्मं चर इत्युक्त्वा अर्थिने कन्या प्रदीयते, एतादृशविवाहः प्राजापत्य इति नाम्ना प्रथितः, ईदृशविवाहकृतकन्यायाः जातः पुत्रः षट्-षट्-वंशं पावयेत्। धनं नीत्वा यो विवाहो जायते स आसुरनाम्ना ज्ञायते। वरकन्ययोः समयान्मिथत्वात् गान्धर्वविवाहः जायते। युद्धे कन्यां हृत्वा यो विवाहो जायते स राक्षसविवाहनाम्ना प्रसिद्धः। छलात् कन्यकां हृत्वा कृतः विवाहः पैशाचविवाहोऽस्ति। इति अष्टौ विवाहलक्षणानि वर्णितानि। यदि प्राजापत्यः, ब्राह्मः, दैवः, आर्षः इति चत्वारो विवाहाः निर्दिष्टेषु मास-तिथि-वार-नक्षत्रादिषु जायन्ते, एवञ्च गान्धर्वासुरराक्षसपैशाचविवाहाः सकलमास-तिथि-वार-नक्षत्रादिषु जायन्ते तर्हि तत्शुभाय भवेत्[१]।

कन्याविवाहकालं ग्रहशुद्धिः विषये आलोच्यते यत्-कन्यानां विवाहः षडब्दक उपरिष्टात् षड्वर्षातिक्रमानन्तरं समवर्षेषु सत्सु बटुकन्याजन्मराशेः इत्यादि उक्त गुरुशुद्धौ सत्यां विवाहः शुभः। अर्थात् पुरुषाणां विषमवर्षेषु गोचरप्रकरणोक्त रविशुद्धौ सत्यां विवाहः शुभः[२]।
कन्यायाः विवाहः जन्मलग्नात् ८/१० वर्षे एवञ्च वरस्य अयुग्मवर्षे भवति चेत् तद् शुभं भवति। परन्तु तद्विपरीतरीत्या भवति चेत् उभयोः कृते हानिः भवति। कन्यका विवाहः अयुग्मवर्षे भवति चेत् सा मदभागिनी भवति। पुनश्च युग्मवर्षे भवति चेत् सा विधवा भवेत्। गर्भात् युग्मे ८/१० वर्षे पतिव्रता भवति। उदाहरणरूपेण दीयते यत् कन्यायाः जन्ममासेषु (अयुग्मे) ७/९/११ इत्येतेषु वर्षेषु मासत्रयं पश्चात् विवाहः सम्पाद्यते चेत् तत्शुभाय भवति। एवञ्च युग्मेषु ८/१०/१२ इत्येतेषु वर्षेषु मासत्रयाभ्यन्तरे विवाहः उत्तममिति गर्ग-वाल्मीकि-व्यासादयो सर्वे प्रवदन्ति[३]।

मनुनोच्यते यत् अव्यंगांगीं सौम्यनाम्नीं हंसवारणगामिनीं तनुलोमकेशदशनां मृद्वंगीं स्त्रियमुद्वहेत्। कपिलवर्णयुक्ताम्, अधिकांगीं, रोगिणीम्, अलोमिकाम्, अतिलोमां, वाचाटां, पिंगलाम्, ऋक्षवृक्षनदीनाम्नीम्, अत्यन्तपर्वतनामिकां, पक्ष्यहिप्रेष्यनाम्नीं, विभीषणनामिकां च कन्यां नोद्वहेत्[४]।
जन्मादारभ्यः समवर्षपर्यन्तं कन्यायाः विवाहः शुभमिति मुनिभिः मन्यन्ते। आधानकालतः समवर्षेषु कन्यायाः विवाहः सम्पाद्यते चेत् तत् अशुभं भवति। पुनश्च विषमवर्षे तासां विवाहः सम्पाद्यन्ते चेत् तदपि अशुभमिति कश्चित् पण्डिता अङ्गीक्रियते। अयुग्मवर्षे कन्यायाः विवाहः भवति चेत् सा दुर्भगा भवति। पुनश्च युग्मवर्षे विवाहः भवति चेत् सा कन्या विधवा भवति। सुतरां गर्भान्विते युग्मवर्षे विवाहे सा कन्या पतिव्रता भवति।

कन्यायाः जन्मामासादारभ्यः मासत्रयादनन्तरं अयुग्मवर्षे, युग्मे तु मासत्रयमेव च विवाहः भवति चेत् तत् शुद्धिः इति वात्स्यादिभिः स्वीक्रियन्ते। युवतेः जन्ममासतः विषमेषु अष्टममासेषु मासत्रयमेव

विवाहर्थां परमं शुद्धवर्षं भवति। विषमवर्षेषु मासत्रयः पश्चादेव तासां कृते जन्ममासः शुद्धं भवति इति सर्वेषां पण्डितानां कथनस्य अभिप्रायः वर्त्तते।

समवर्षेषु आदौ मासत्रयं कन्यायाः विवाहः कृते अशुभं भवति। परन्तु मासत्रयादूर्ध्वं गर्भमासान्विताः वर्षशुद्धिश्च भवति इति नारदेन उक्तम्। ग्रहाब्दौ युवतेः शुद्धिविवाहः भवति चेत् शुभं तथा हीनः भवति चेत् तासां कृते विवाहः हीनमपि भवति। पुनश्च शुद्धापकर्षेण नक्षत्रादि शुद्धं भवति चेत् वर्षशुद्धिः शुभनक्षत्रेण समाप्तिर्भवति। कन्यायाः विवाहकाले यदि ग्रहाब्दयोः संशुद्धिः भवति तर्हि विवाहजगति तत् शुभदं भवति। परन्तु तत्र यदि ग्रहशुद्धिं न भवति तर्हि केवलं वर्षशुद्धिविषये अवश्यमेव विचारणीयम्[५]।

अनन्तरं उत्तराषाढादिनक्षत्रैः उपलक्षिते काले वस्त्रालङ्कारादिशब्देन खाद्यादिमधुरवस्तुभिः सहितैः फलपुष्पैः आदौ कन्यां संतोष्य तोषयित्वा अनुपश्चात् कन्यावरणं हि निश्चयेन स्यात्। कन्यावरयोः लक्षणानिसामुद्रिकात् अध्यायात् अवगन्तव्यानि[६]।

गर्भादारभ्यः सप्तवर्षात् परं दशवर्षाभ्यन्तरे च कन्यायाः विवाहः सार्ववर्णिकः भवति। अष्टमवर्षस्य कन्या गौरी, नवमवर्षस्य कन्या रोहिणी, दशवर्षस्य कन्या, तदनन्तरं रजस्वला इत्यादिभिः संज्ञया अवगम्यते। गोरीसंज्ञका कन्यया सह विवाहे पिता ब्रह्मलोकं प्राप्नोति। एवम्प्रकारेण रोहिण्येति संज्ञया सह विवाहे सूर्यलोके, कन्याख्यया सह दानेन च पिता स्वर्गलोके गच्छति। परन्तु रजस्वलाख्यया कन्यया सह विवाहः अनुष्ठियते चेत् पिता रौरवः नामेति नरकलोकं गच्छति। द्वादशवर्षादनन्तरं कन्या दानं न करोति चेत् पिता मासिमासि तस्याः शोणितं पिवति। पिता, माता, ज्येष्ठभ्राताश्च एतैः कन्यादानं न प्रयच्छन्ते चेत् दण्डस्वरूपेण ते सर्वे नरकं प्रति गच्छन्ति।[७]

वरस्य कुलस्वभावं, मातरं, पितरं, विद्यां, वित्तं, शरीरं, वयः इति सप्तगुणान् परीक्ष्य कन्या देया, अन्यत् किमपि न चिन्तनीयम्। श्वेतकुष्ठी, रोगी, ब्रह्मघ्नः, क्षयरोगी, अन्धः, परिवित्तिः, बधिरः, दूरदेशगः, मद्यपः इत्यादिव्यसनासक्तचित्ताय वराय कन्या न देया इति बुधाः वदन्ति। वसिष्ठः- अत्यासन्नः, अतिदूरः, अत्याढ्यः, अतिनिर्धनः, वृत्तिहीनः, मूर्खेति षड्भ्यः कन्या न देया। एवञ्च दूरस्थेभ्यः, अविद्याभ्यः, मोक्षधर्मेच्छुकेभ्यः, शूरेभ्यः, निर्धनेभ्यश्च कन्या न दीयते[८]।

अधुना वरवरणमुहूर्त्तविषये विचार्यते यत्-धरणिदेवो ब्राह्मणः पुरोहितादिः। चण्डेश्वरः। पूर्वात्रितयम् आग्नेयम् उत्तरात्रितयं तथा। रोहिणी तत्र वरणे भगणः शस्यते सदा। उपवीतं फलं पुष्पं वासांसिविविधानि च। देयं वराय वरणे कन्याभ्रात्राद्विजेन वेति[९]।

बहवो योगाः दरीदृश्यन्ते, ते यथा- यस्य जनस्य बुधशुक्रौ सप्तमस्थाने भवतः तस्य भार्या न तिष्ठति। शुभग्रहस्य दर्शनेन वार्धक्यावस्थायां स स्त्रीं लभते। यस्य मनुष्यस्य जन्मलग्नात् ७।१२ इति स्थाने पापग्रहो भवति एवं च पञ्चमस्थाने चन्द्रः तिष्ठति स मनुष्यः कलत्रहीनः मनुजस्तनूजैः विवर्जितश्च स्यादिति चिन्तनीयम्। यस्य लग्नादथवा चन्द्रमसः सप्तमपापग्रहः स्थितः तस्य बलयोगात् स्त्री नंष्टव्या, यस्य चन्द्रमाः शनैश्वरः च सप्तमे स्थाने भवति स द्विरूढजाया लभते। यस्य सप्तमस्थाने मंगलो भवति अथवा सप्तमस्थानं शनितः दृष्टं भवति स पुरुषः स्त्रीरहितः स्यात्। यस्य सप्तमे शुभग्रहदृष्टिर्नजायते तस्य भार्या लब्धा परञ्च मृता भवेत्। यस्य सप्तमस्थाने राहुः भवेत् स च पापग्रहद्वयेन दृष्टश्चेत् तस्य नरस्य यस्मिन् काले जायया साकं साक्षात्कारः जायते तस्मिन् काले एव जाया म्रियते। यस्य षष्ठे मंगलः, सप्तमे राहुः, अष्टमे शनैश्वरः भवेत् तस्य स्त्रियः विनाशः जायते।

यदि कस्यचित् जनस्य द्वादशतमे स्थाने मंगल-सूर्य-चन्द्राः अवतिष्ठन्ति तर्हि तेन पुरुषेण एका स्त्री, एकः पुत्रश्च लभ्यते। यस्य पुरुषस्य सप्तमस्थाने शुक्रः, लग्ने शनिः, गण्डान्तसमये जन्म भवति, सप्तमे स्थाने च शुभग्रहाणां दृष्ट्यभावो दृश्यते स पुरुषः वन्ध्या-कन्यायाः पतिर्भवेत्। यस्य पञ्चमस्थाने चन्द्रमाः स्थितः, सप्तमतमे द्वादशतमे च स्थाने पापग्रहत्रयं तिष्ठति तस्य स्वप्नेऽपि भार्यायाः सुखलेशः न जायते। यस्य सप्तमस्थाने सूर्यः मंगलस्य नवांशकः अथवा सप्तमे सूर्यबुधौ भवतः तर्हि राजसुतः अपि एकभार्यापतिर्भवेत्। यस्य लग्ने सूर्यः सप्तमस्थाने च शनिः विद्यते तस्य स्त्रियः मृत्युर्भवेत्। यस्य चतुर्थे अष्टमे च स्थाने शुक्रपापग्रहयोः मध्यावस्थानम् अपि च शुभग्रहाणां दृष्ट्यभावो लक्ष्यते तस्य भार्यायाः नाशः पाशवह्निभिः जायते। यस्य नरस्य लग्ने शनिः सप्तमे च शुक्रराशेः सन्निधानं दृश्यते स पुरुषः वन्ध्याकन्यकायाः पतिः स्यात्। शनि-मंगल-चन्द्रादयः एकस्मिन् स्थाने यस्य पुरुषस्य स्थिता भवन्ति स पुरुषः व्यभिचारी, तस्य जाया च व्यभिचारिणी स्यात्। यस्य सप्तमस्थाने सूर्यः, चतुर्थस्थाने मंगलः, अष्टमे द्वादशे च बृहस्पतिः अवतिष्ठति तस्य पत्नीद्वयं भवति। तयोः द्वयोः पत्न्योः एका जीवति एका च म्रियते। यस्य चतुर्थस्थाने राहुः, सप्तमे मंगलः, अष्टमे शनिः इति स्थितिः जायते तस्य नरस्य पत्नीत्रयं म्रियते।

प्रश्नसमये अथवा जन्मसमये यस्याः व्यक्तेः लग्ने सूर्यः, सप्तमे चन्द्रमाश्च भवति तस्याः व्यक्तेः जायात्रयं विद्यते। ईदृशाः बहवो योगाः जातकशास्त्रे परिलक्ष्यन्ते ते योगाः अस्माभिः विचार्याः। कन्यायाः वैधव्ययोग-विषाख्ययोगादीनां, वरस्य स्त्रीहारकयोगादीनां च गणना कार्या। यदि कन्यावरयोर्मध्ये समानता वर्तते तर्हि उद्वाहः कार्यः, यदि वरस्य स्त्रीहारकयोगो विद्यते तर्हि विवाहः न कर्तव्यः। यस्याः कन्यायाः योगः उत्तमः एवञ्च सम्पूर्णरूपेण सादृश्यमस्ति चेत् तस्याः शान्तिः अपेक्षिता[१०]।

राशीनां वर्णः आदौ राशिविचारे उल्लिखितः, इदानीं वर्णफलविषये चर्चा जायमाना वर्तते- यदि नारी वर्णज्येष्ठा पुरुषश्च वर्णहीनः स्यात् तर्हि उभौ विवाहं न कुर्याताम्। यदि विवाहं कुर्वीत तर्हि तस्याः नार्याः भर्ता विनश्यति[११]।

तत्रादौ वर्णकूटं प्रमाणिकया उच्यते यत् द्विजा इति। मीनकर्कटवृश्चिकाद्विजाः ब्राह्मणाः ततः अनन्तरम् अन्ये मेषसिंहधनुराशयो नृपाः क्षत्रियाः। वृषकन्यामकराविशो वैश्याः। मिथुनतुलाकुम्भा अंघ्रिजाः शूद्राः। तत्र वरवधूराश्योः वर्णौ ज्ञात्वा वरस्य वर्णतो ब्राह्मणादिकावधूरधिकाज्येष्ठवर्णा बुधैः न शस्यते। किन्तु समाहीना वा शस्यत इत्यर्थः। एको गुणः सदृग्वर्णे तथा वर्णोत्तमे वरे। हीनवर्णे वरे शून्यं केप्याहुः सदृशे दलमिति[१२]।

वर्णमित्रतातायाः सम्बन्धे विचार्यते यत्-कर्कः, वृश्चिकः, मीनः इत्येतेषां राशीनां ब्राह्मणवर्णः। मेषः, सिंहः, धनुः इत्येतेषां राशीनां

क्षत्रियवर्णः। वृष, कन्या, मकरः इत्येतेषां राशीनां वैश्यवर्णः। तुला, मिथुनः, कुम्भः इत्येतेषां राशीनां शुद्रवर्णः। उत्तमवर्णस्य वरः सर्वदा श्रेष्ठो भवति। परन्तु वरः अपेक्षया उत्तमवर्णस्य कन्या श्रेष्ठो भवति चेत् अशुभः भवति[१३]। वर्णादीनां गुणाः क्रमानुसारेण एकैकवृद्धितो ज्ञेया। विवाहेषु वर्णादीनां गुणः अष्टादशाधिके शुभं भवति। यदि उत्तमवर्णस्य वरः तथा वरकन्ययोः वर्णः एकमेव भवति तर्हि एकगुणः, हीनवर्णे गुणाभावः भवति। परन्तु कश्चित् आचार्यस्य मतानुसारं वरकन्ययोः वर्णः समान भवति चेत् तत्र अर्द्धगुणः भवति[१४]।

वधूवरयोः वर्णैक्ये समानवर्णे अथवा कन्या अपेक्षया वरस्य वर्णोत्तमे सति एको गुणः स्यात्। परन्तु कन्यायाः वर्णापेक्षया वरस्य अनुत्तमवर्णे गुणाभाव इत्यर्थः[१५]।

अनन्तरं मित्रतायाः विषये कथ्यते यत् यजनयाजनादीनि षट्कर्माणि तानि येषां ते षट्-कर्माणः विप्राः तेषाम्। शासितदेवदैत्यो अधिपौ स्तः। शासिताः शिक्षिताः देवदैत्या याभ्यां तो गुरुशुक्रौ इत्यर्थः राजन्यानां क्षत्रियाणां समूहो राजन्यकं तस्याधिपती कुजाक स्तः। विट्छूद्रयोः क्रमेण चंद्रबुधो। विशां चंद्रः शूद्राणां बुध इति। संकीर्णानां संकरभवानां निषादादीनां पतिः शनिः। स्त्रीनृषु वधूवरेषु वर्णमैत्री स्यात्। तद्यथा-राश्यधिपयोः वर्णो विलोक्यौ। तत्र उत्तमवर्णः पुरुषः शस्तः समवर्णो मध्यः हीनवर्णो अधम इति। एतदुक्तं ग्रन्थकृता स्वदेशप्रसिद्धेः। अन्यदेशे तु-

**"मीनादब्राह्मणपूर्वा वर्णाः कन्योत्तमो वरः श्रेष्ठः।**
**मध्यस्थः समवर्णो नीचो हीनोद्भवः पुरुषः।।"**

इति। इयं वर्णमैत्री केवलं गुणमात्रा न तु मेलकनिर्णयाय। अतो मेलक निर्णयानं तरमेवोक्ता[१६]।

मानवः स्वभावत एव इदं जिज्ञासते यत्कथमेतत्सर्वं संविधीयमानमस्ति। मनोवैज्ञानिकदृष्ट्या एतज्ज्ञातुं शक्यतेऽत्र यन्मानवस्य उपर्युक्तया जिज्ञासया एव ज्योतिषशास्त्रस्य रहस्योद्घाटनं जातम् अस्ति। परन्तु तत् कथमिति पृच्छति चेत् तत्र उच्यते मानवजीवनस्य प्रत्येकमुहूर्त्ते बहूनि समस्यानि परिलक्ष्यन्ते। तत्र मूलकारणं भवति सम्यक् विषयज्ञानस्य अभावः एव। इत्यस्मिन् विषये उदाहरणानि सन्ति। तेषु विषयेषु प्रथमतया संस्कारविषये आलोच्यते चेत् तत्र उच्यते गर्भाधानादारभ्यः अन्त्येष्टिं यावत् संस्कारैः जनाः संस्कृताः भवन्ति स्म। संस्कारैः संस्कृतजनानां ज्ञानक्षमता धर्मरूचीनां विकाशश्च सम्भवतः। ये जनाः संस्कृताः भवन्ति तेषां जीवनम् अमूल्यं सुरक्षितं ज्ञानोपेतं च भवति। तस्य जीवनं निष्ठया विश्वासेन च पूर्णं भवति। पुनश्च अद्यतने समाजे सांसारिकजीवने दाम्पत्यकलहः अधिकतया परिलक्ष्यते। इत्यत्र वरकन्ययोः लग्नदोषः, ग्रहः, राशिः, तिथयः, विवाहकालः चेत्यादि विषये सम्यक् ज्ञानस्य अभावः भवति। परन्तु ज्योतिषाशास्त्रानुसारं एतेषां दोषानां परिहारः क्रियते चेत् वैवाहिकजीवने अवश्यमेव सुखप्राप्तुम् अर्हति। पुनश्च परिवारस्य शान्तिहेतोः गृहनिर्माणाय शास्त्रदृष्ट्या वास्तुनिर्वाचनम् एको गुरुत्वपूर्णविषयो भवति। केवलं वास्तुविचारः. नास्ति, तत्र गृहप्रवेशमुहूर्त्तः, शुभाशुभवारः इत्यादीनि बहूनि विचार्यविषयाणि सन्ति।

**पादटीका**

[१]सं.द., प्र.-८, श्लो.-१-६
[२]मु.चि., प्र.-६, श्लो.-१२, पृ.-१७९
[३]मु.प्र., प्र.-६, श्लो.-१-३, पृ.-७०-७१
[४]मु.सं.द., प्र.-८, श्लो.-७-९
[५]रा.मा., श्लो.- ३८६-३९१
[६]मु.चि., प्र.-६, श्लो.-१०, पृ.-१७८
[७]मु.प्र., प्र.-६, श्लो.-५-१०, पृ.-७१-७२
[८]मु.सं.द., प्र.-८, श्लो.-१०-१३
[९]मु.चि., प्र.-६, श्लो.-११, पृ.-१७८
[१०]मु.सं.द, प्र-८, श्लो.-४४-५६
[११]मु.सं.द, प्र-८, श्लो.-५९
[१२]मु.चि., प्र.-६, श्लो.-२२
[१३]मु.ग., प्र.-१५, श्लो.-२१, २२, पृ.-१३९
[१४]मु.ग., प्र.-१५, श्लो.-५८-५९, पृ.-१४४
[१५]मु.ग., प्र.-४, श्लो.-१०, पृ.-३८
[१६]वि.वृ., श्लो.-१६